# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – नवम्बर-दिसम्बर, २०१६

| | | |
|---|---|---|
| कक्षा – शास्त्रितृतीयवर्षम् (SEM-5) | **प्रश्नपत्रम् – ५** | गुणाः - ७० |
| विषयः – सर्वदर्शनम् | **कोड – CC-3.5.9** | समयः – ११ तः ०२ पर्यन्तम् |
| दिनाङ्कः – २९/११/२०१६ | सन्दर्भग्रन्थः – मीमांसापरिभाषा | |

---

### प्रथमान्वितिः (Unit-1)

**प्रश्नः – १ अधस्तनेषु द्वयोः प्रश्नयोः उत्तरं प्रदीयताम् ।** ०८

(१) धर्माधर्मनिरूपणं यथाशास्त्रं प्रतिपादयत

(२) वेदद्वैविध्यं ग्रन्थानुसारं वर्णयत।

(३) प्रयोगविधिं सोदाहरणं स्पष्टयत।

**प्रश्नः – २ निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत।** ०८

(१) विधेः त्रैविध्यं यथाग्रन्थम् उपपादयत

(२) मीमांशास्त्रस्य विषये परिचयात्मकम् एकं निबन्धं लिखत।

**प्रश्नः – ३ निम्नलिखितेषु द्वयोः उपरि लघुटिप्पणीं लिख्यताम्।** ०४

(१) ब्राह्मणवाक्यभेदाः।

(२) अपूर्वम्।

(३) गुणवाक्यम्

(४) मीमांसापरिभाषायाः मङ्गलाचरणम्।

**प्रश्नः – ४ अधोनिर्दिष्टेषु पञ्चानाम् अतिलघूत्तरं यच्छत** ०५

(१) मीमांसापरिभाषा केन विरचिता?

(२) किं नाम मन्त्रः?

(३) किं नाम ब्राह्मणम्?

(४) "उद्भिदा यजेत पशुकामः" इति कीदृशं वाक्यम्?

(५) मीमांसासूत्राणि केन प्रणीतानि?

(६) किं नाम अपूर्वविधिः?

(७) "पञ्च पञ्चनखा भक्ष्याः" इत्यत्र कः विधिः?

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः – ५ अधस्तनेषु द्वयोः प्रश्नयोः उत्तरं प्रदीयताम्** ०८

(१) ग्रन्थोक्तदिशा अङ्गत्वबोधकप्रमाणेषु श्रुतेः प्राबल्यं साधयत

(२) कर्मभेदविचारं यथाशास्त्रं प्रतिपादयत।

(३) शाब्दीभावनां यथाशास्त्रं विचारयत।

**प्रश्नः – ६ निम्नलिखितयोः कस्यचिद् एकस्य उत्तरं लिखत।** ०८

(१) श्रुत्यादिषट्प्रमाणानां यथाशास्त्रं विचारं प्रस्तूयताम्

(२) आर्थीभावनायाः सोदाहरणं वर्णनं कुरुत।

**प्रश्नः – ७ निम्नलिखितेषु द्वयोः उपरि लघुटिप्पणीं लिख्यताम्।** ०४

(१) भावनालक्षणम्।

(२) प्रकरणलक्षणम्।

(३) द्विविधं कर्म।

(४) काम्यकर्मणः त्रैविध्यम्।

**प्रश्नः – ८  अधोनिर्दिष्टेषु पञ्चानाम् अतिलघूत्तरं यच्छत**  ०५

(१) अङ्गत्वबोधकप्रमाणानि कति सन्ति ?

(२) अङ्गत्वबोधकप्रमाणेषु किं नाम लिङ्गम्?

(३) किं नाम वाक्यम् ?

(४) किं नाम यागः ?

(५) वेदाः पौरुषेयाः उत अपौरुषेयाः ?

(६) भावना कतिविधाः ?

(७) "अपौरुषेयं वाक्यं वेदः" इति के वदन्ति ?

## तृतीयान्वितिः (Unit-3)

**प्रश्नः – ९  अधस्तनेषु द्वयोः प्रश्नयोः उत्तरं प्रदीयताम्**  ०८

(१) अर्थवादनिरूपणं यथाग्रन्थं कुरुत

(२) मन्त्रविचारं स्पष्टयत।

(३) परिसङ्ख्यायाः दोषत्रयं यथाग्रन्थं उपपादयत

**प्रश्नः – १०  निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत।**  ०८

(१) भारतीयदर्शनानां विषये एकं निबन्धं विलिख्य मीमांसादर्शनस्य वैशिष्ट्यं प्रतिपादयत

(२) यथाशास्त्रं वेदस्य प्रामाण्यविचारं निबन्धयत

**प्रश्नः – ११  निम्नलिखितयोः कस्यचिद् एकस्य उपरि लघुटिप्पणीं लिख्यताम्**  ०२

(१) मीमांसा इति शब्दार्थः।

(२) अपौरुषेयः वेदः।

**प्रश्नः – १२  अधोनिर्दिष्टेषु कयोश्चिद् द्वयोः अतिलघूत्तरं यच्छत।**  ०२

(१) अर्थवादः कतिविधः ?

(२) "मन्त्रब्राह्मणयोः" किं नामधेयम् ?

(३) किं नाम शेषत्वम् ?

(४) मङ्गलाचरणं कतिविधं भवति?

***

# Answer Key

कक्षा – शास्त्रितृतीयवर्षम् (SEM-5) **प्रश्नपत्रम् – ५** गुणाः - ७०

विषयः – सर्वदर्शनम् **कोड – CC-3.5.9** समयः – ११ तः ०२ पर्यन्तम्

दिनाङ्कः – २९/११/२०१६ सन्दर्भग्रन्थः – मीमांसापरिभाषा

## प्रथमान्वितिः (Unit-1)

**प्रश्नः – ३**

१. अनेकविधम् – कर्मोत्पत्तिवाक्यम्, गुणवाक्यम्, फलवाक्यम् , फलाय गुणवाक्यम्, सगुणकर्मोत्पत्तिवाक्यम् इत्यादि ।

२. आशुतरविनाशिनां कर्मणां कालान्तरभाविफलसाधनत्वोपपत्त्यर्थमन्तरा पुण्यपापरूपम् अपूर्वं कल्प्यते ।

३. विहिते कर्मणि तदङ्गतया द्रव्यदेवताविधायकं वाक्यं गुणवाक्यम् ।

४. सूर्यनारायणं वन्दे देवीं त्रिपुरसुन्दरीम् । गुरूनधिगतार्थांश्च निरन्तरमहं भजे ॥
बालानां शास्त्रसिद्धार्थलेशबोधाय धीमताम् । मीमांसापरिभाषेयं क्रियते कृष्णयज्वना

**प्रश्नः – ४**

१. श्रीकृष्णयज्वना

२. प्रयोगसमकालीनस्मारको मन्त्रः ।

३. विधायकं वाक्यं ब्राह्मणम् ।

४. सफलकर्मोत्पत्तिवाक्यम् ।

५. जैमिनिना ।

६. अत्यन्ताप्राप्तमर्थं प्रापयति सोऽपूर्वविधिः ।

७. परिसङ्ख्याविधिः।

## द्वितीयान्वितिः (Unit-2)

**प्रश्नः – ७**

१. भावनात्वं नाम भवितुः प्रयोजकव्यापारत्वम्

२. प्रकरणं नाम परस्पराकाङ्क्षा । यथा- दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत इति ।

३. अर्थकर्म गुणकर्म चेति

४. केवलम् ऐहिकफलकम्, आमुष्मिकफलकम्, ऐहिकामुष्मिकफलकञ्चेति ।

**प्रश्नः – ८**

१. षट् । श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्याभेदेन ।

२. सामर्थ्यम् ।

३. पदान्तरसमभिव्याहारो वाक्यम् ।

४. देवतोद्देशेन द्रव्यत्यागः यागः ।

५. अपौरुषेयाः ।

६. त्रिविधाः ?

७. मीमांसकाः

## तृतीयान्वितिः (Unit-3)

**प्रश्नः – १२**

१. चतुर्विधः – निन्दा-प्रशंसा-परकृति-पुराकल्पभेदात्

२. वेदः

३. अङ्गत्वम् ।

४. त्रिविधम् ।